**पुत्रा(त्त्रा)दिन्** पु॰ पुत्रमत्ति अद–णिनि आक्रोशे गम्ये तकारस्य वा द्वित्वम्। (बेटाखेक) पुत्रभक्षकत्वेन आक्रुश्यमाने १पुरुषे २तथाभूतायां स्त्रियां स्त्री ङीप्।

**पुत्रान्नाद** पु॰ पुत्रस्य पुत्रोपहृतमन्नमत्ति अद–अण् उप॰स॰। कुटीचके सन्न्यासिभेदे त्रिका॰ कुटीचकशब्दे दृश्यम्।

**पुत्रिक** त्रि॰ पुत्रोऽस्त्यस्य ठन्। पुत्रयुक्ते। ततः पुरोहिता॰ भावे यक्। पौत्रिक्य तद्युक्तत्वे न॰।

**पुत्रिका** स्त्री पुत्री+स्वार्थे क।१कन्यायाम् शब्दर॰।२पुत्तल्यां ३यावकतूले च मेदि॰। अपुत्रेण समयभेदेन ४कृतायां सुतायां स्त्री। स च समयः तद्विभागादिश्च मनुनोक्तो यथा “अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्। यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम्। अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः। विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः। ददौ च दश धर्माय, कश्यपाय त्रयोदश। सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम्। यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा। तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्” “दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत्। स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च। पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः। तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः। पुत्रिकायां कृतायान्तु यदि पुत्रोऽनुजायते। समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः” “मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः। द्वितीयन्तु पितुस्तस्यास्तृतीयं तत्पितुःपितुः”। अधिकं पुत्रिकापुत्रशब्दे दृश्यम्।

**पुत्रिकापुत्र** पु॰ पुत्रिकैव पुत्रः, ६त॰ वा। १पुत्रिकारूपपुत्रे २पुत्रिकायाः पुत्रे च यथाह वशिष्ठः “अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति”। “अथ वा पुत्रिकैव सुतः पुत्रिकासुतः सोऽप्यौरससम एव पित्रवयवानामल्पत्वान्मात्रवयवानां बाहुल्याच्च यथाह वशिष्ठः “द्वितीयः पुत्रिकैवेति। द्वितीयः पुत्रः कन्यैवेत्यर्थः इति, मिताक्षरा। अत्र विशेषो दायभागोक्तो यथा “तत्र पुत्रिकौरसयोस्तुल्यांशित्वं न पुनः पुत्रिकाया ज्येष्ठत्वेन विंशोद्धारार्हता तदाह मनुः “पुत्रिकायां कृतायान्तु” (इत्यादि अनुपदमुक्तम्) अतो ज्येष्ठपुत्रकार्यकरणात् स्वपुत्रद्वारेण पुत्रिकायाः पिण्डदातृत्वात्। तदाह मनुः “अपुत्रोऽनेन विधिना” (इत्यादि उक्तम्)। न च पुत्रिकायामेव प्रथमं पुत्रे जाते तदनन्तरमौरसपुत्रोत्पत्तौ पुत्रिकापुत्रस्य ज्येष्ठांशता भवेदिति वाच्यं तस्य पौत्रत्वात् तदाह मनुः “अकृता वा कृता वापि यं विन्देत् सदृशात् सुतम्। पौत्री मातामहस्तेन दद्यात् पिण्डं हरेद्धनम्”। पुत्रिका हि पुत्रस्तस्याः पुत्रः पौत्र एव भवति तद्वांश्च पौत्री भवति न च ज्येष्ठत्वेन पौत्रस्यांशातिरेकः स्मृतोऽस्ति”। यत्तु वशिष्ठवचनम् “अभ्रातृकां प्रदास्यामि” (इत्यादि उक्तम्)। पुत्रिकापुत्रस्यैव पुत्रत्वं वदति तेन पुत्रिकायास्तत्पुत्रस्य च पुत्रत्वं तत्र मनुविरोधात् पिण्डदानमात्रयोगात् पुत्रत्वमस्य गौणं तद्द्वारेणैव पुत्रिकायाः पिण्डदातृत्वात् एकस्य सतोऽन्यस्य तद्युयोगात्। पुत्रिकौरसयोस्तु सवर्णत्वे सति पूर्वोक्तविभागो बोद्धव्यः असवर्णत्वे तयोरसवर्णौरसपुत्रवदेव विभागः पुत्रिकौरसयोः समानत्वात्। यदि च कृतापि पुत्रमनुत्पाद्यैव विधवा मृता बन्ध्यात्वेनवाऽवस्थिता तदा तस्याः पितृधनेऽनधिकारः स्वधाकरपुत्रार्थं पुत्रिकायाः कृतत्वात् तदभावे दुहितृन्तरतुल्यत्वात्” दा॰भा॰। व्याकृतं चैतत् श्रीकृष्णेन “ज्येष्ठता श्रेष्ठता सा च पुन्नामनरकत्राणनिबन्धना तदभावात् श्रेष्ठत्वाभाव इत्याह अत इति साक्षादित्यर्थः। ज्येष्ठत्वेनेति। ज्येष्ठपुत्रकार्यं पुन्नामनरकत्राणं तत्करणात्। तर्हि पुत्रिकाकरणं किमर्थमत आह स्वपुत्रद्वारेणेति। स्वधाकरं त्रिविधक्रियाकरम् अन्यथा स्वधाकरशब्दस्य श्राद्धकरणमात्रार्थत्वे दौहित्रान्तरसाधारण्यात् पुत्रिकाकरणवैयर्थ्यापत्तेः। एतेन पुत्रिकापुत्रसत्त्वेऽपि पुत्रिकाया एव प्रेतकृत्याधिकार इति मतमपि निरस्तमिति वेदितव्यं तथा च परम्परयोपकारार्थमेव पुत्रिकापुत्रकरणमिति भावः। ज्येष्ठांशतेति। तस्य साक्षादेव ज्येष्ठपुत्रकार्यकरणादिति भावः। पौत्रत्वादिति आतिदेशिकपौत्रत्वादित्यर्थः। मनुविरोधादिति। न च विनिगमनाविरहः किं मनुविरोधात् वशिष्ठोक्तं पुत्रत्वं गौणं, किं वा वशिष्ठविरोधात् मनूक्तं पौत्रत्वमेव गौणमिति वाच्यं मनुस्मृतेः सर्वस्मृतिप्रबलत्वस्यैव विनिगमकत्वात्। पुत्रत्वं पुत्रव्यपदेशः। गौणमिति पिण्डदातृत्वस्य मुख्यपुत्रगुणस्य योगात् गौणता बोध्या। पिण्डदानयोगमेवोपपादयति तद्द्वारेणैवेति। एकस्य पुत्रिकापुत्रस्य, अन्यस्य पुत्रिकास्वरूपस्य तद्युयोगात् पुत्रत्वयोगात्। न च परम्परया पिण्डदानापेक्षया साक्षात् पिण्डदानस्य बलवत्त्वेन पुत्रिकापुत्रस्यैव पुत्रत्वं न्याय्यं